# Gayatri Gita

# ગાયત્રી ગીતા

## Document Information

Text title : gAyatrI gItA

File name : gaayatrii_giitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Transliterated by : Sunder Hattangadidot com

Proofread by : Sunder Hattangadidot com

Translated by : Pages 103-111 of English translation

Description-comments : From the book Superscience of Gayatri

Latest update : February 2, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# ગાયત્રી ગીતા

ઓમિત્યેવ સુનામધેયમનઘં વિશ્વાત્મનો બ્રહ્મણઃ
સર્વેષ્વેવ હિ તસ્ય નામસુ વસોરેતત્પ્રધાનં મતમ્ ॥
યં વેદા નિગદન્તિ ન્યાયનિરતં શ્રીસચ્ચિદાનન્દકં
લોકેશં સમદર્શિનં નિયમનં ચાકારહીનં પ્રભુમ્ ॥ ૧॥

ભૂર્વૈ પ્રાણ ઇતિ બ્રુવન્તિ મુનયો વેદાન્તપારં ગતાઃ
પ્રાણઃ સર્વવિચેતનેષુ પ્રસૃતઃ સામાન્યરૂપેણ ચ ।
એતેનૈવ વિસિદ્ધ્યતે હિ સકલં નૂનં સમાનં જગત્ ।
દ્રષ્ટવ્યઃ સકલેષુ જન્તુષુ જનૈર્નિત્યં હ્યસુશ્ચાત્મવત્ ॥ ૨॥

ભુવર્નાશો લોકે સકલવિપદાં વૈ નિગદિતઃ
કૃતં કાર્યં કર્તવ્યમિતિ મનસા ચાસ્ય કરણં ।
ફલાશાં મર્ત્યા યે વિદધતિ ન વૈ કર્મનિરતાઃ
લભન્તે નિત્યં તે જગતિ હિ પ્રસાદં સુમનસામ્ ॥ ૩॥

સ્વરેષો વૈ શબ્દો નિગદતિ મનઃસ્થૈર્યકરણં
તથા સૌખ્યં સ્વાસ્થ્યં હ્યુપદિશતિ ચિત્તસ્ય ચલતઃ ।
નિમગ્નત્વં સત્યવ્રતસરસિ ચાચક્ષતિ ઉત ।
ત્રિધાં શાન્તિં હ્યેતાં ભુવિ ચ લભતે સંયમરતઃ ॥ ૪॥

તતો વૈ નિષ્પત્તિઃ સ ભુવિ મતિમાન્ પણ્ડિતવરઃ
વિજાનન્ ગુહ્યં યો મરણજીવનયોસ્તદખિલમ્ ।
અનન્તે સંસારે વિચરતિ ભયાસક્તિરહિત-
સ્તથા નિર્માણં વૈ નિજગતિવિધીનાં પ્રકુરુતે ॥ ૫॥

સવિતુસ્તુ પદં વિતનોતિ ધ્રુવં
મનુજો બલવાન્ સવિતેવ ભવેત્ ।
વિષયા અનુભૂતિપરિસ્થિતય-
સ્તુ સદાત્મન એવ ગણેદિતિ સઃ ॥ ૬॥

વરેણ્યઞ્ચૈતદ્વૈ પ્રકટયતિ શ્રેષ્ઠત્વમનિશં
સદા પશ્યેચ્છ્રેષ્ઠં મનનપિ શ્રેષ્ઠસ્ય વિદધેત્ ।
તથા લોકે શ્રેષ્ઠં સરલમનસા કર્મ ચ ભજેત્
તદિત્થં શ્રેષ્ઠત્વં વ્રજતિ મનુજઃ શોભિતગુણૈઃ ॥ ૭॥

ભર્ગો વ્યાહરતે પદં હિ નિતરાં લોકઃ સુલોકો ભવેત્
પાપે પાપ-વિનાશને ત્વવિરતં દત્તાવધાનો વસેત્ ।
દૃષ્ટ્વા દુષ્કૃતિદુર્વિપાક-નિચયં તેભ્યો જુગુપ્સેદ્ધિ ચ
તન્નાશાય વિધીયતાં ચ સતતં સઙ્ઘર્ષમેભિઃ સહ ॥ ૮॥

દેવસ્યેતિ તુ વ્યાકરોત્યમરતાં મર્ત્યોઽપિ સમ્પ્રાપ્યતે
દેવાનામિવ શુદ્ધદૃષ્ટિકરણાત્ સેવોપચારાદ્ ભુવિ ।
નિઃસ્વાર્થં પરમાર્થ-કર્મકરણાત્ દીનાય દાનાત્તથા
બાહ્યાભ્યન્તરમસ્ય દેવભુવનં સંસૃજ્યતે ચૈવ હિ ॥ ૯॥

ધીમહિ સર્વવિધં શુચિમેવ
    શક્તિચય વયમિતુપદિષ્ટાઃ ।
નો મનુજો લભતે સુખશાન્તિ-
    મનેન વિનેતિ વદન્તિ હિ વેદાઃ ॥ ૧૦॥

ધિયો મત્યોન્મથ્યાગમનિગમમન્ત્રાન્ સુમતિમાન્
વિજાનીયાત્તત્ત્વં વિમલનવનીતં પરમિવ ।
યતોઽસ્મિન્ લોકે વૈ સંશયગત-વિચાર-સ્થલશતે
મતિઃ શુદ્ધૈવાચ્છા પ્રકટયતિ સત્યં સુમનસે ॥ ૧૧॥

યોનો વાસ્તિ તુ શક્તિસાધનચયો ન્યૂનાધિકશ્ચાથવા
ભાગં ન્યૂનતમં હિ તસ્ય વિદધેમાત્મપ્રસાદાય ચ ।
યત્પશ્ચાદવશિષ્ટભાગમખિલં ત્યક્ત્વા ફલાશં હૃદિ
તદ્ધીનેષ્વભિલાષવત્સુ વિતરેદ્ યે શક્તિહીનાઃ સ્વયમ્ ॥ ૧૨॥

પ્રચોદયાત્ સ્વં ત્વિતરાંશ્ચ માનવાન્
    નરઃ પ્રયાણાય ચ સત્યવર્ત્મનિ ।
કૃતં હિ કર્માખિલમિત્થમઙ્ગિના
    વદન્તિ ધર્મં ઇતિ હિ વિપશ્ચિતઃ ॥ ૧૩॥

ગાયત્રી-ગીતાં હ્યેતાં યો નરો વેત્તિ તત્ત્વતઃ ।

સ મુક્ત્વા સર્વદુઃખેભ્યઃ સદાનન્દે નિમજ્જતિ ॥ ૧૪॥

From the book Superscience of Gayatri : Gayatri Mahavigyan
Pandit Sriram Sharma Acharya
at www.awgp.org
Translation (pages 103-111)
http://literature.awgp.org/englishbook/GayatriYagya/SuperScienceofGayatri.103

Encoded and proofread by Sunder Hattangadi

*Gayatri Gita*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*